इधाति, "प्राणो वाव ज्येष्ठः श्रेष्ठश्च" इति श्रुतिनिर्देशात्" भा० "ज्येष्ठश्च प्राणः" सू० "शुक्रनिषेककालादारभ्य तस्य वृत्तिलाभात्, न चेत् तस्य तदानीं वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न सम्भवेद्वा, श्रोत्रादीनान्तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभान्न ज्येष्ठत्वम्"भा० "श्रेष्ठश्च प्राणः गुणाधिक्यात्"सू० "न वै शक्ष्यामस्त्वदृते जीवितुम्" इति श्रुतेश्च भा० । "न वायुक्रिये पृथगुपदेशात्" सू० "स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते । तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण इति, एवं हि श्रूयते, "यः प्राणः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः" इति । अथ वा तन्त्रान्तरीयाभिप्रायात् समस्तकरणवृत्तिः प्राण इति प्राप्तं, एवं हि तन्त्रान्तरीया आचक्षते । "सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च" इति । अत्रोच्यते । न वायुः प्राणः नापि करणव्यापारः कुतः पृथगुपदेशात् । वायोस्तावत् प्राणस्य पृथगुपदेशो भवति, "प्राण एव ब्रह्मणश्चतुर्थः पादः, स वायुना ज्योतिषा भाति च तपति च" इति । न हि वायुरेव सन् वायोः पृथगुपदिश्यते तथा करणवृत्तेरपि पृथगुपदेशो भवति, वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक्प्राणस्यानुक्रमणात् । न हि करणव्यापार एव सन् करणेभ्यः पृथगुपदिश्येत । तथा "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुः" इत्येवमादयोऽपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्त्तव्याः । न च समस्तानां करणानामेका वृत्तिः सम्भवति, प्रत्येकमेकैकवृत्तित्वात्, समुदायस्य चाकारकत्वात् । ननु पञ्जरचालनन्यायेन एतद्भविष्यति यथैकपञ्जरवर्त्तिना एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः सम्भूयैकं पञ्जरं चालयन्ति एवमेकशरीरवर्त्तिनः एकादश प्राणाः प्रत्येकं नियतवृत्तयः सन्तः सम्भूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्ते इति । नेत्युच्यते, युक्तम् तत्र प्रत्येकवर्त्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः पक्षिणः सम्भूयैकं पञ्जरं चालयेयुरिति तथा दृष्टत्वात् । इह तु श्रवणाद्यवान्तरव्यापारोपेताः प्राणा न सम्भूय प्राण्युरिति युक्तं, प्रमाणाभावात् अत्यन्तविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य । तथा प्राणस्य श्रेष्ठत्वाद्युद्घोषणं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणेऽवकल्पते, तस्मादन्यो वायुक्रियाभ्यां प्राणः"

कथं तर्हीयं श्रुतिः, "यः प्राणः स वायुः" इति, उच्यते । वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते न तत्त्वान्तरं नापि वायुमात्रं, अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते । स्यादेतत्, प्राणोऽपि तर्हि जीववदस्मिन् शरीरे स्वातन्त्र्यं प्राप्नोति, श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनामिन्द्रियाणाम् । तथा हि अनेकविधा विभूतिः प्राणस्य श्राव्यते "सुप्तेषु वागादिषु प्राण एकैको जागर्त्ति प्राण एकैको मृत्युनाऽनाप्तः प्राणः संवर्गो वागादीन् संवृङ्क्ते प्राण इतरान् प्राणान् रक्षति मातेव पुत्रान्" इति । तस्मात् प्राणस्यापि जीववत् स्वातन्त्र्यप्रसङ्गः, तं परिहरति" भा० "चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः" सू० "तुशब्दः प्राणस्य स्वातन्त्र्यं व्यावर्त्तयति । यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्त्तृत्वं भोक्तृत्वं च प्रत्युपकरणानि न स्वतन्त्राणि तथा मुख्योऽपि प्राणो राजमन्त्रिवत् जीवस्य सर्वार्थत्वेन उपकरणभूतो न स्वतन्त्रः । कुतः तत्सहशिष्ट्यादिभ्यः तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते, प्राणसंवादादिषु समानधर्माणाञ्च सह शासनं युक्तं बृहद्रथन्तरादिवत् । आदिशब्देन संहतत्वाचेतनत्वादीन् प्राणस्य स्वातन्त्र्यनिराकरणहेतून् दर्शयति । स्यादेतत् यदि चक्षुरादिवत् प्राणस्य जीवं प्रति करणभावोऽभ्युपगम्येत विषयान्तरं रूपादिवत् तस्य प्रसज्येत रूपालोचनाद्याभिर्वृत्तिभिर्यथा चक्षुरादीनां जीवं प्रति करणभावो भवति । अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः संगृहीताः न तु द्वादशमपरं कार्यजातमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायत इति । अत उत्तरं पठति" भा० "अकरणत्वाच्च न दोषस्तथा हि दर्शयति" सू० "न तावद्विषयान्तरप्रसङ्गो दोषः अकरणत्वात् प्राणस्य । न हि चक्षुरादिवत् प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते । न चास्यैतावता कार्य्याभाव एव । कस्मात्, तथा हि श्रुतिः प्राणान्तरेष्वसम्भाव्यमानं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयति । प्राणसंवादादिषु "अथ ह प्राणा अहं श्रेयसि व्यूदिरे" इत्युपक्रम्य "यस्मिन् व उत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः" इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्तिमात्रहीनं यथापूर्वं जीवनं मुख्यप्राणस्य वैशेषिकं कार्य्यं दर्शयित्वा